## आदर्शप्रश्नपत्रम्
## (2025-26)
## संस्कृतम् केन्द्रिकम् - कोड न. 322
## कक्षा-द्वादशी(XII)

**समयः-होरात्रयम्(Three hours)** **पूर्णाङ्काः-80**

सामान्य निर्देशाः -

. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे पृष्ठानि मुद्रितानि सन्ति।

. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रमुखाः प्रश्नाः सन्ति।

. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति-

खण्डः (क) अपिठत-अवबोधनम् - 10 अङ्काः

खण्डः (ख) रचनात्मककार्यम् - 15 अङ्काः

खण्डः (ग) अनुप्रयुक्तव्याकरणम् - 20 अङ्काः

खण्डः (घ) I. पठित-अवबोधनम् - 25 अङ्काः

II. संस्कृत - साहित्येतिहास - परिचयः - 10 अङ्काः

. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमांङ्काः अवश्यं लेखनीयाः।

. प्रश्न संख्या प्रश्नपत्रानुसारम् अवश्यम् एव लेखनीया ।

. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

## अपठित-अवबोधनम्
## खण्ड क

**1. अधोलिखितं गद्यांशं पठित्वा दत्त-प्रश्नान् संस्कृतेन उत्तरत- 10**

आधुनिकवैज्ञानिकयुगे दूरदर्शनम् एकम् आश्चर्यकरम् आविष्कारम् अस्ति । गृहस्थिताः एव जना: दूरस्थानि चिपिस्वनेत्रयोः पुरतः पश्यन्ति, चित्रगतानां जनानां वचनानि च कर्णाभ्याम् प्रत्यक्षतः श‍ृण्वन्ति । अयं हि विद्युत्तरंगाणां चमत्कारः। अस्य मूलरूपेण आविष्कारक: नियकाऊमहोदयः अस्ति। बेयर्डफार्सवर्थ-ज्वोरिकननामकै: वैज्ञानिकै: एतत् वर्तमानरूपं आविष्कृतम्।

दूरदर्शनप्रेषकयन्त्रैः क्रमवीक्षणपद्धत्या चित्राणि आकाशे विद्युत्तरंगैः प्रेष्यन्ते तानि च संग्राहियन्त्रैः गृहीत्वा चित्रपटे प्रवचने दूरदर्शनम् आबालवृद्धानां मनोरञ्जनस्य साधनम् स्वीकृतम् । शिक्षाज्ञानकलाराजनीतिप्रभृतिषुक्षेत्रेषु अस्य अतीव सजीवचित्राणि दृष्ट्वा अल्पज्ञः अपि गम्भीरार्थम् सम्यक् अवगन्तुम् आत्मसात् च कर्तुं शक्नोति । आकर्षका कार्यक्रमान् रूपकाणि, नृत्यानि, महापुरुषाणां जीवनवृत्तम् देश-विदेशीयचित्राणि एकान्ते स्वेच्छानुसारं गृहे आसीना: एव वयम् द्रष्टुम् शक्नुमः ।

**प्रश्ना:-**

**अ) एकपदेन उत्तरत – 2x1=2**

(i) दूरदर्शनस्य मूलरूपेण आविष्कारकः कः अस्ति?

(ii) दूरदर्शनस्य वर्तमानरूपम् कै: वैज्ञानिकैः आविष्कृतम् ?

(iii) आधुनिकयुगे किं आश्चर्यकरं आविष्कारम् अस्ति?

**आ) पूर्णवाक्येन उत्तरत - 2x2=4**

(i) केषु क्षेत्रेषु दूरदर्शनस्य महत्त्वम् ?

(ii) वयम् दूरदर्शने किं पश्यामः ?

(iii) कुत्र दूरदर्शनस्य अतीव महत्त्वं वर्तते?

**(इ) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत - 1x1=1**

**(ई) भाषिककार्यम् – (प्रश्नत्रयम) – 3x1=3**

(क) "अल्पं जानाति' इति वाक्यांशाय प्रयुक्तं पदं अस्ति।

(i) सर्वज्ञः (ii) बहुज्ञः (iii) अल्पज्ञः (iv) विशेषज्ञः

(ख) "आकर्षकान्" अस्य पदस्य विशेषणपदं किम्?

(i) कार्यक्रमान् (ii) साधनान्, (iii) महापुरूषान्, (iv) वृद्धानाम्

(ग) "आसीनाः एव वयं द्रष्टुं शक्नुमः" अत्र क्रियापदं किम्?

(i) आसीनाः (ii) द्रष्टुम् (iii) शक्नुमः (iv) वयम्

(घ) अत्र "स्वीकृत्य" पदस्य किं पर्यायपदं प्रयुक्तम्?

(i) दृष्टवा (ii) गृहीत्वा (iii) अवगन्तुम् (iv) आविष्कृतम्

**खण्ड-ख**

**रचनात्मकं कार्यम्- (15)**

**2. गुवाहाटीनगरे छात्रावासे निवसत: भवत: नाम अभिनेष: अस्ति। पित्रे लिखितं रक्तदानशिविरविषयकं इदं पत्रं मञ्जूषापदैः पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत- ½x10=5**


छात्रावासतः
गुवाहाटीनगरम्
तिथि:............

पूज्या: (i)...........
चरणवन्दना।
अत्र कुशलं तत्र अपि अस्तु। अद्य अहं भवन्तं निवेदयामि यद् अस्माकं विद्यालये गते सप्ताहे (ii).............. आयोजितम् । अस्माकं कक्षा अध्यापक: (iii)................ प्रमुख: आयोजकः आसीत् । सः प्रथमं (iv) ............ प्रायच्छत्। तदनन्तरम् (v) ........ पञ्च छात्रा: एतस्मिन् शुभकार्ये अग्रेसराः अभवन् तेषाम् उत्साहं (vi)..........मम मनसि अपि भावना संजाता तथा च मयाऽपि स्वरक्तं (vii).............। आशासे यद् मम एतां भावनां (viII)......... प्रसन्नो भविष्यति। अहं पूर्णतया सकुशलोऽस्मि। (ix)..........चिन्तया।

भवत: (x)............
अभिनेष:

| |
|---|
| प्रदत्तम्, रक्तदानशिविरम् दशमकक्षाया:, पितृमहोदया:!, आज्ञाकारी, स्वरक्तं, शिविरस्य, दृष्ट्वा, ज्ञात्वा, अलं |

3) .(अ) अधः प्रदत्तं चित्रम् आधृत्य पञ्चविंशतितः त्रिंशत्परिमितैः शब्दैः अनुच्छेदमेकं लिखत- 5



मञ्जूषा

| |
|---|
| गुरुकुलम्, छात्राः, प्राकृतिक वातावरणम्, प्राचीनकाले, शिक्षाव्यवस्था, उत्तमा |

आ) **"जलम् एव जीवनम्" इतिविषयमधिकृत्य पञ्चविंशतितः त्रिंशत्परिमितैः शब्दैः अनुच्छेदं लिखत।**

| |
|---|
| जलम्, प्राणीनां, जीवनम्, नद्यः, मधुरम्, पृथिव्यां, पादपानां, संरक्षणीयम्, वर्षाजलं |

**4)अ- मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत – ½x10=5**

एकदा गुरुः द्रोणाचार्य: दुर्योधनम् (i)-------आदिशत् "वत्स ! नगरे सर्वाधिकं गुणवन्तं जनम् अन्विष्य (ii)दुर्योधनः (iii)-------आसीत् । स: सर्वत्र (iv)--------आगच्छत् अवदत् च - भगवन् ! (v)------ गुणवत्तर: कोऽपि नास्ति इति।" आचार्य: पुनः युधिष्ठिरम् आहूय (vi)----------"वत्स ! संसारे सर्वाधिकं गुणहीनं जनम् (vii)-------आनय इति।" युधिष्ठिरः आगत्य अवदत्- "प्रभो ! मत्तः गुणहीन: संसारे कोऽपि नास्ति।" आचार्य:(viii)-----आशीषम् अयच्छत् - "प्रियपुत्र ! तव कीर्तिः कदापि न (ix)------------।" नूनं सत्यमेव उच्यते - यथा दृष्टिः (x)-----सृष्टिः।

| |
|---|
| मञ्जूषा-अहङ्कारी, अन्विष्य, नंक्ष्यति, आहूय, भ्रान्त्वा, आदिष्टवान्, तथा, आनय, मत्तः, युधिष्ठिराय। |

**अथवा**

**आ-अधोलिखिते संवादे मञ्जूषायाः सहायतया रिक्तस्थानानि पूरयत -**

माधवः- मित्र! भवान् क्रीडनाय वाटिकां न आगच्छत्। अपि गृहे सर्व कुशलम्?

रामः (i)-----------------------------------------------------

माधवः तर्हि किमर्थं नागच्छत्?

रामः (ii)----------------------------------------------------

माधवः अहो! वाराणसीं सर्वे परिवारजनाः अगच्छन्। बहूत्तमम् । किं किं दृष्टम्?

रामः (iii)----------------------------------------------------

माधवः वाराणस्याः विषये बहुधा श्रुतम् अस्ति। किम् अन्वभत् तत्र भवान्?

रामः आनन्दप्रदं नगरं तत्, सर्वेऽपि तत्र चिन्तारहिताः हरहरमहादेव इति वदन्तः व्रजन्ति ।

माधवः अहो! अद्भुतं खलु तद् दृश्यम्। किं सायङ्कालस्य गङ्गाघट्टस्य दृश्यम् अवालोकयत्?

रामः (iv)------------------------------------------------------

माधवः सत्यं वदति, अहम् अत्र विवरणं श्रुत्वैव आनन्दितः भवामि ।

रामः भवान् अपि कदापि गच्छतु यतोहि वस्तुतः दर्शनीय स्थले तत् ।

माधवः (v)----------------------------------------------------

रामः स्वागतम्, पुनर्मिलामः राम राम!

मञ्जूषा

| |
|---|
| आम्, अद्भुते दृश्ये भवति तन्त्र यदा गङ्गारती भवति तदा जनाः सर्वत्र घट्टे उपविश्य आनन्दिताः भवन्ति । |
| आम् मित्र! परिवारसदस्यैः सह विमर्श कृत्वा योजनां करिष्यामि। धन्यवादः । |
| सर्वप्रथम तु गङ्गाखाने कृतं पश्चात् च विश्वनाथदर्शनम् अकुर्म। |
| आम् मित्र! गेहे सर्व कुशलमेव । |
| वयं गृहे न आस्म, सर्वेऽपि भ्रमणार्थ वाराणसीम् अगच्छाम । |

**खण्ड - ग**

**अनुप्रयुक्तव्याकरणम् 20**

**5.अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं सन्धिपदं सन्धिविच्छेदं वा कुरुत- (केवलं प्रश्नषट्कम्) 1x4=4**

(i) आर्तस्य यथौषधम्।

(ii) उदर्केण गुणेन + अत्र भवितव्यम्।

(iii) यान्यस्माकं सुचरितानि यानि त्वयोपास्यानि ।

(iv) न वयं शिवगणास्तादृशाः।

अथवा

**(आ) अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत-**

(i) यस्य न + अस्ति + अन्ध एव सः।

(ii) सेतुर्येन महोदधौ विरचितः।

(iii) अहम् आसुरीष्वेव योनिषु क्षिपामि।

(iv) विनिर्मितम् + छादनम् अज्ञतायाः ।

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्यः चिनुत- (केवलं प्रश्नपञ्चकम्) 1x4=4**

**(i) अतिथिदेवो भव।**

(क) अतिथिः एव देवः यस्य सः। (ख) अतिथिः एव देवः (ग) अतिथि: च देवः च

**(ii) <u>धैर्यसागरः</u> लक्ष्मणः केन क्षोभितः।**

(क) धैर्येण सागरः (ख) धैर्यस्य सागरः (ग) धैर्याय सागरः

**(iii) ) शूरं <u>कृतज्ञं</u> दृढ़सौहदं च।**

(क) कृतस्य विस्मरणं करोति यः तम् (ख) कृतं जानाति यः तम् (ग) कृतस्य ज्ञाता

**(iv) कथं सन्यासिनोऽपि <u>कठोरभाषणैः</u> तिरस्करोषि?**

(क) कठोरैः भाषणैः (ख) कठोरस्य भाषणैः (ग) कठोरं भाषणैः

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृतिं प्रत्ययं प्रदत्तविकल्पेभ्यः चिनुत- (केवलं प्रश्नषट्कम) 4x1=4**

**(i) सत्यान्न <u>प्रमदितव्यम्</u>।**

(क) प्र + मद् + तव्यत् (ख) प्र + मद् + शानच् (ग) प्र + मद् + अनीयर

**(ii) वत्सराजः तं न <u>हतवान्</u>।**

(क) हन् + क्तवतु ख) हत + मतुप् ग) हत + वान्

**(iii)शोकादवचनात् राज्ञा हस्तेनैव <u>विसर्जितः</u>।**

(क) वि + सर्ज + तः (ख) वि + सर्जि + क्त (ग) वि + सृज् + क्त

**(iv) <u>शुद्धि + मतुप</u> तदन्वये दिलीपः प्रसूतः।**

(क) शुद्धिमत् (ख) शुद्धिमतुप् (ग) शुद्धिमति

**8. समुचितं उपपदविभक्तिरूपं चिनुत- 4x1=4**

**(i) आचार्यः...........अनुशास्ति।**

(क) अन्तेवासिना (ख) अन्तेवासिनम् (ग) अन्तेवासिने

**(ii) .............सह सीता वनं गन्तुम् इच्छति।**

(क) रामेण (ख) रामस्य (ग) रामाय

**(iii) हा धिक्!...............अविज्ञाय उपालभसे।**

(क) तुभ्य (ख) अस्मान् (ग) अहम्

**(iv) न ......... अपि समं गता वसुमती, नूनं त्वया यास्यति।**

(क) एकेन (ख) एकस्य (ग) एकात्

**9. (अ)वाच्यानुसारं समुचितैः पदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं लिखत-4x1=4**

रामभद्रः भोः नारायण! (i) ........ अधुना कुत्र गम्यते?

नारायणः किं न जानासि त्वम्? सः पठनाय (ii)------------- गच्छति ।

रामभद्रः तेन गृहं पुनः कदा (iii) ...........?

नारायण - निश्चयेन अध्ययनं समाप्य एव (iv)---------गृहं प्रत्यागमिष्यति।

मञ्जूषा

| |
|---|
| आगमिष्यते, विदेशम्, सः, श्यामेन। |

अथवा

(आ) वाच्यानुसारं समुचितैः पदैः रिक्तस्थानानि पूरयित्वा अधोलिखितानि वाक्यानि लिखत-

(i) किं तेन सः--------------(ज्ञा)?

(ii)------------- (अस्मद्) न जानामि ।

(iii) गुरुः सर्वान्------------ (शिष्य) पाठयति।

(iv) शिष्यैः ध्यानेन------------(पाठ) पठ्यन्ते ।

**खण्ड -घ (भागः-1)**

**पठितावबोधनम् 25**

**10. अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत - 5**

संवृत्ते किञ्चिवन्धकारे भुशुण्डी स्कन्धे निधाय निपुर्ण निरीक्षमाणः, आगत-प्रत्यागतं च विदधानः, प्रतापदुर्गदौवारिकः कस्यापि पावक्षेपध्वनिमिवाश्रौषीत्। ततः स्थिरीभूय पुरतः पश्यन् सत्यपि दीपप्रकाशे कमप्यनवलोकयन् गम्भीरस्वरेणैवम् अवादीत्-"कः कः भोः?" इति। अथ क्षणानन्तरं पुनः स एव पादध्वनिरश्रावीति भूयः साक्षेपमवोचत्-"क एष मामनुत्तरयन् मुमूर्षुः समायाति बधिरः? ततो "दौवारिक! शान्तो भव किमिपि व्यर्थ मुमूर्षुरिति बधिर इति च वदसि?" इति वक्तारमपश्यतैवाऽऽकर्णि मन्द्रस्वरमेदुरा वाणी। अथ "तत् किं नाज़ायि अद्यापि भवता प्रभुवर्याणामादेशो यद् दौवारिकेण प्रहरिणा वा त्रिःपृष्टोऽपि प्रत्युत्तरमददद् हन्तव्यः इति' इत्येवं भाषमाणेन द्वाःस्थेन "क्षम्यतामेष आगच्छामि, आगत्य च निखिलं निवेदयामि' इति कथयन् द्वादशवर्षेण केनापि भिक्षावटुनानुगम्यमानः कोऽपि काषायवासाः धृततुम्बीपात्रः भव्यमूर्तिः संन्यासी दृष्टः। ततस्तयोरेवम् अभूदालापः-

**1. एकपदेन उत्तरत – (प्रश्नद्वयम्) 2x ½ =1**

(क) दौवारिक: कि श्रृणोति?

(ख)दौवारिक: भुशुण्डी कुत्र निधाय भ्रमति?

(ग) कः साक्षेपमवोचत्?

**2. पूर्णवाक्येन उत्तरत – (प्रश्नद्वयम्) 2x1=2**

(क) दौवारिक: साक्षेपं किम् अवोचत्?

(ख) संन्यासी केन अनुगम्यमानः आसीत्?

(ग) धृततुम्बीपात्रः कः आसीत्?

**3. (अ) निर्देशानुसारम् उत्तरत -2x1=2**

(क)"भव्यमूर्तिः संन्यासी'' अनयोः पदयोः विशेषणपदं किम्?

(ख)"मुमूर्षुः समायाति बधिरः'' अत्र क्रियापदं किम्?

अथवा

**. (आ) निर्देशानुसारम् उत्तरत -**

(क)"प्रकाशे'' इति पदस्य विलोमपदं किम्?

(ख) 'स्वामिवर्याणाम्' इत्यस्य पर्यायपदं किं प्रयुक्तम्?

**11.अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत- 5**

"प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।
न शौचं नापि चाऽऽचारो न सत्यं तेषु विद्यते।।
एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ।।"

**I एकपदेन उत्तरत-(केवलप्रश्नद्वयम्)** 2x1/2=1

(क) आसुराः जनाः कस्य क्षयाय प्रभवन्ति?
(ख) कीदृशाः जनाः प्रवृत्तिं निवृत्तिं च न विदुः?
(ग) उग्रकर्माण: के सन्ति ?

**II पूर्णवाक्येन उत्तरत(केवलप्रश्नद्वयम्)** 2x1=2

(क) कीदृशाः जनाः जगतः क्षयाय प्रभवन्ति ?
(ख) आसुरेषु जनेषु किं किं न विद्यते ?
(ग) आसुराः जनाः किं न विदुः?

III **(अ) निर्देशानुसारम् उत्तरत -2x1=2**

(क) 'दृष्टिम्' इत्यस्य किं विशेषणपदमत्र प्रयुक्तम् ?
(ख) 'विनाशाय' इत्यर्थे किं पदमत्र?

अथवा

**(आ) निर्देशानुसारम् उत्तरत-**

(क) 'न सत्यं तेषु विद्यते' अत्र क्रियापदं किम् ?
(ख)"अशौचम्" इत्यस्य विलोमपदं अत्र किम् अस्ति ?

**12. अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत - 5**

सीता - आर्यपुत्र! रोदितव्ये काले सौमित्रिणा धनुर्गृहीतम्। अपूर्वः खल्वस्यायासः।

रामः - सुमित्रामातः! किमिदम्?

लक्ष्मणः - कथं कथं किमिदं नाम।

**क्रमप्राप्ते हृते राज्ये भुवि शोच्यासने नृपे।**

**इदानीमपि सन्देहः किं क्षमा निर्मनस्विता ॥**

रामः - सुमित्रामातः! अस्मद्राज्यभ्रंशो भवत उद्योगं जनयति। आः अपण्डितः खलु भवान्।

**भरतो वा भवेद् राजा वयं वा ननु तत् समम्।**

**यदि तेऽस्ति धनुश्श्लाघा स राजा परिपाल्यताम् ॥**

लक्ष्मणः न शक्नोमि रोष धारयितुम्। भवतु भवतु। गच्छामस्तावत्।

(प्रस्थितः)

रामः **- त्रैलोक्यं दग्धुकामेव ललाटपुटसंस्थिता।**

**भृकुटिर्लक्ष्मणस्यैषा नियतीव व्यवस्थिता ॥**

**1. एकपदेन उत्तरत - (प्रश्नद्वयम्)2x ½=1**

(क) रोदितव्ये काले केन धनुर्गृहीतम्?

(ख) रामः "अपण्डितः" कं कथयति?

(ग) कुत्र शोच्यासने नृपे?

**2. पूर्णवाक्येन उत्तरत - (प्रश्नद्वयम्) 2x1=2**

(क) लक्ष्मणस्य धनुश्श्लाघा कस्मिन् कार्ये अस्ति?

(ख) त्रैलोक्यं दग्धुकामेव का संस्थिता?

(ग) कः रोषं धारयितुं न शक्नोति?

3. **–**(अ)यथानिर्देशम् उत्तरत **(प्रश्नद्वयम्) 2x1=2**

(क) 'गच्छामस्तावत्' अत्र क्रियापदं किम्?

(ख) "हसितव्ये" इति पदस्य विलोमपदं किं प्रयुक्तम्?
अथवा

(आ)यथानिर्देशम् उत्तरत-

(ख)'ललाटपुटसंस्थिता भृकुटि:'' अनयोः पदयोः विशेष्यपदं किम्?

(ग) अत्र "गतः' इत्यर्थे किं पदं प्रयुक्तम्?

**13.अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषा- प्रदत्तपदैः पूरयित्वा पुनः लिखत - 1x3=3**

आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।

आगमैः सदृशारम्भ आरम्भसदृशोदयः

भावार्थ:-यथा राजा दिलीप: विशालः ..........आसीत् तथैव तस्य...........अपि विशाला आसीत्। बुद्धेः अनुसार.............अभ्यासमपि करोति स्म। शास्त्रोक्तविधिना कार्य करोति स्म, तदनुरूपमेव फलं प्राप्नोति स्म।

**मञ्जूषा**

| |
|---|
| आकारे, शास्त्राणां, बुद्धिः, |

**अथवा**

**प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थ चित्वा लिखत-1x3=3**

**1. एकेनापि सुपुत्रेण आह्लादितं कुलं सर्वम्।**

(क) एकेन एव योग्यपुत्रेण सर्वः वंशः प्रसन्नः भवति।

(ख)एकेन एव योग्यपुत्रेण सर्वः वंशः.दःखी भवति।

(ग) एकेन  अयोग्यपुत्रेण सर्वः वंशः प्रसन्नः भवति।

**2. शरीरेऽरिः प्रहरति हृदये स्वजनस्तथा।**

(क) अरिः हृदये प्रहरति, स्वकीयः जनः शरीरे प्रहरति।

(ख)शत्रुः शरीरे प्रहरति, आत्मीयः जनः च हृदये प्रहरति ।

(ग) अरिः हृदये शरीरे च प्रहरति ।

**3. त्रिविधं नरकस्येदं द्वारम् ।**

(क) नरकस्य द्वारं त्रिविधं कथितम्।

(ख) द्वारपालस्य नाम त्रिविधम् अस्ति।

(ग) नरकासुरस्य इदं द्वारम् अस्ति

**14. अधोलिखित-अन्वये रिक्तस्थानानि पूरयत- 3x1=3**

I. आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि।

मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ।

**अन्वयः**

कौन्तेय! ततः (ते) (i) .........जन्मनि (ii).......... आसुरीं योनिम् आपन्ना (iii) ...........अप्राप्य एव अधमां गतिं यान्ति ।

| |
|---|
| जन्मनि ,मूढा, माम्, |

**15. (अ) 'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत -4x1=4**

| "अ" वाक्यांशः | "आ" वाक्यांशः |
|---|---|
| (1) स्वायत्तमेकान्तगुणं विधात्रा | (क) विद्यावतां वस्तुत एव रूपम्। |
| (2) रूपं प्रसिद्धं न बुधास्तदाहुः | (ख) क्रमेलकः कण्टकजालमेव। |
| (3) न दुर्जनः सज्जनतामुपैति | (ग) विनिर्मितं छादनमज्ञतायाः। |
| (4) निरीक्षते केलिवनं प्रविश्य | (घ) शठः सहस्रैरपि शिक्ष्यमाणः। |

अथवा

(आ) अधोलिखितवाक्येषु रेखांकितानां पदानां प्रसंगानुसार शुद्धम् अर्थ लिखित,

1. कस्य यूनो हृदयं **सहसा** उत्कण्ठितं न भवति ।

2. रमणीनाम् **आलाप** इव श्रूयते ।

3. मदालसे **तूष्णीं** किमर्थ तिष्ठसि ।

4. माता एवं प्रथम आचार्या इत्यस्ति में **अवधारणा** ।

5. **दिष्ट्या** वर्धैथां युवाम् ।

| |
|---|
| वार्तालापम्, मौनम्, भाग्येन, विचारः, अकस्मात् |

## 'घ' भागः 2

## संस्कृतसाहित्येतिहासपरिचयः 10

**16. समुचितस्य कवेः रचनायाः नाम वा कवेः नाम लिखत - (केवलं प्रश्नत्रयम) 3x1=3**

(i) अम्बिकादत्तव्यासः” अस्य लेखकस्य रचना का?

(ii) 'मदालसा" इत्यस्य पाठस्य रचयिता कः?

(iii) अनुशासनम्" इति पाठः कस्याः उपनिषदः सङ्गृहीतः

(iv) 'कार्याकार्यव्यवस्थितिः" इत्यस्य पाठस्य रचयिता कः?

**17. गद्य-पद्य-नाटक-विधानां समुचितं वैशिष्ट्यं मञ्जूषात:चित्वा रिक्तस्थानानि पूरयत-(केवलं प्रश्नत्रयम) 3x1-3**

(i).............कवीनां निकषं वदन्ति ।

(ii) खण्डकाव्यमेव.........नाम्नापि ज्ञायते।

(iii) सर्गबन्धो.................कथ्यते ।

(iv) ............संस्कृतगद्यस्य प्राणाः

**मञ्जूषा**

| |
|---|
| गद्यं ,गीतिकाव्यं ,महाकाव्यं, ओजः |

**18. नाट्य-तत्त्वानां समुचितं वैशिष्ट्यं मञ्जूषात: चित्वा रिक्तस्थानानि पूरयत(केवलं) प्रश्नचतुष्टयम)4x1=4**

(i) संस्कृतनाटकानि (क) दश

(ii) रूपकस्य (ख) सुखान्तानि

(iii) नाटकस्य अन्ते (ग) रघुवंशम्

(iv) कालिदासस्य प्रसिद्धं महाकाव्यम् (घ) भरतवाक्यम्